International Journal of Sanskrit Research 2017; 3(3): 132-133

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(3): 132-133
© 2017 IJSR
www.anantaajournal.com
Received: 08-03-2017
Accepted: 09-04-2017

**Vigneshwar Bhat**
Assistant Professor
Department of Languages
Amrita University
Mysuru, Karnataka, India

**Correspondence**
**Vigneshwar Bhat**
Assistant Professor
Department of Languages
Amrita University
Mysuru, Karnataka, India

# पूर्वमीमांसादर्शनसारसंग्रहावलोकनात्मकम् अध्ययनम्

**Vigneshwar Bhat**

**प्रस्तावना**

सुखान्वेषणे मग्नाः भवन्ति सर्वे प्राणिनः। तत्रापि मानवाः ज्ञानशीला इति प्रसिद्धाः। मानवः स्वेष्टसिद्धये सन्मार्गं अन्विष्यति। सन्ति सुखप्रापकानि अनेकानि कर्माणि परं तानि शास्त्रबोधितानि उत नेति विवेचना युक्ता। धर्मजन्यानि वा उत अधर्मजन्यानि वा सुखप्रदायकानि भवन्ति चेत् अलम्, इति न कदाचिदपि चिन्तनीयः। सुखं न कदाचिदपि बलवत्तरदुःखसंसृष्टं भवेत्। अधर्मायत्तं महद्दुःखायैव भवति इत्यत्र नास्ति काचित्संशीतिः। लोके तावदधर्ममार्गेण सम्पादितसुखानां इदानीन्तनं दुःखं वयमवगच्छामः। तद्यथा शत्रुनिवारणेन सुखं भविष्यति इति धिया हतशत्रुः काराग्रहे निवसति आजीवनं दुःखमनुभोक्ष्यति च। किमर्थं सुखसम्पादनाय कृतेन कर्मणा दुःखप्राप्तिरितिचेत् गृहीताधर्ममार्ग इति तस्योत्तरं भवति।
अतः विज्ञायते धर्ममार्गेण सुखं सम्पादनीयमिति। तर्हि अपेक्षितं धर्माऽधर्मज्ञानम्। कथं वा अस्य सम्पादनम् ? कथं वा तस्यानुष्ठानम् ? किं वा अस्याधिष्ठानम् ? कथं वा अस्य निर्णयः? इत्यादयः प्रश्नाः सामान्या एव। तत्रोत्तरविवक्षवः शास्त्रमधिगच्छन्ति वेदम् अन्विषन्ति च। कस्मिन् ज्ञाते सर्वेषामुत्तरं लभ्येत इति चेत् समस्तः वेद एव स्मृतिपथमलङ्कःरोति। कदाचित् भूखननं, लोहान्वेषणं, तैलान्वेषणं सुशकं स्यात्। परं श्रुत्यर्थज्ञानं दुःशकमेव इत्यत्र नास्ति संशयलेशः। तस्मात् तस्य विज्ञानायैव अनेकानि शास्त्राणि प्रवृत्तानि विराजन्ते। धर्मावबोधनाय चतुर्दशविद्यास्थानानि प्रथितानि। तत्र वेदचतुष्टयमपि अन्तर्भूतम्। अन्यद्दशकं वेदचतुष्टयज्ञानाय अवकल्पते। श्रूयते च याज्ञवल्क्ये–

> पुराणन्यायमीमांसा धर्मशास्त्राङ्गःमिश्रिताः।
> वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।। (याज्ञ.स्मृ.1.3)

**पूर्वमीमांसादर्शनस्यवैशिष्ठ्यम् :**

अत्रोपस्थितेषु विना मीमांसाम् अन्यानि प्रत्यक्षां श्रुतिं न विचारयन्ति। अपि तु तत्र तत्र श्रुतिम् उदाहरन्ति। परंतु मीमांसा आसमन्तात् वेदं विवेचयति। षमीमांसा इत्युक्ते काऽसौ कर्ममीमांसा उत ब्रम्हमीमांसा इति सञ्जायते संशयः। यदि वेदम् अनुक्रमम् अध्येष्यामस्तदा कर्ममीमांसा एव प्रथमतः उपस्थीयते। तस्मात् परं ब्रम्हमीमांसायाः उपस्थितिः। मीमांसां विना कथं वा यज्ञप्रक्रियाः आतिष्ठेरन् ? अत एव वेदे श्रूयते षमीमांसां चक्रेष (तै.आ.1) इति। तस्मादेव विज्ञायते न नूतना इयं मीमांसा इति। मीमांसा नाम वाक्यार्थविचारः। मान पूजायामम् (पाधा.पा.1843) इत्यस्मात् धातोः जिज्ञासार्थक– सन् प्रत्यये सति उत्पन्नोऽयं मीमांसा शब्दः। अत एव विचारं ब्रूते। अस्ति काचित् प्रसिद्धिः मीमांसाप्रवर्तकः जैमिनिरिति। सः प्रवर्तकः न तु मीमांसाकर्ता। जैमिनेः प्रागपि इयं मीमांसा आसीदिति केषुचित् ग्रंथेषु श्रूयते। तद्यथा षब्रम्हा प्रजापतये मीमांसां प्रोवाच सोऽप्यग्नये सोऽपि इन्द्राय स च वसिष्ठाय सोऽपि पराशराय पराशरः कृष्णद्वैपायनाय सोऽपि जैमिनये स्वोपदेशादनन्तरम् अमुं न्यायं सूत्ररूपेण निबद्धवानितिष सिद्धान्तचन्द्रिकायां श्रूयते।
धर्मप्रतिपिपादयिषुणा अधर्मनुनुत्सुना महर्षिणा जैमिनिना सूत्रजालमीमांसा प्रत्यपादीति अविवादः। अतश्च मीमांसा प्रवर्तकः जैमिनिरिति आमनन्ति। वेदवाक्यानां विज्ञानाय पुनरनेके नियमाः स्वकीये शास्त्रे जैमिनिना उपस्थापिताः। श्रुत्यर्थावगतये ये नियमाः अपेक्षितास्ते सर्वे महर्षिणा समुपस्थापिताः।

**मीमांसादर्शनस्य अध्यायविभागाः :**

शास्त्रेऽस्मिन् सन्ति द्वादशा अध्यायाः। अतोऽस्य शास्त्रस्य अस्ति नामधेयान्तरं षद्वादशलक्षणीष इति। द्वादशसु अध्यायेषु प्रतिपाद्यो विषयः धर्मः। लौकिकवाक्यानामपि चिन्तनमस्मिन् सङ्गःतम्। प्रत्यध्याये विभिन्नो विषयः विचारितः। अस्य सूत्रजालस्य शबरस्वामिनः भाष्यसौकर्यम् अध्ययनेच्छाम् उन्मुखीकरोति। कुमारिलभट्टानां श्लोकवार्तिकं, तन्त्रवार्तिकं, टुप्टीका च अध्ययनेच्छां द्विगुणीकरोति। पार्थसारथिमिश्राणां शास्त्रदीपिकायां कृत्स्नं जैमीनीयसूत्रं विचारितम् वर्तते। खण्डदेवाचार्यैः भाट्टदीपिका विरचिता वर्तते।एवम् अनेकेषां तत्वज्ञानां विवेचकानां च व्याख्या मीमांसाशास्त्रे उपलभ्यते। अध्यायविभागे हेतुः कः? इति जिज्ञासायां धर्मावगमने अपेक्षितानि साधनानि तद्भेदबोधके हेतवः भवन्ति। प्राथम्ये अध्यायविभागः एवं श्रूयते।

धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्रलक्षणैः।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकः।।
अधिकारोऽतिदेशश्च सामान्येन विशेषतः।
ऊहो बाधश्च तन्त्रञ्च प्रसङ्गःश्चोदिताः क्रमात्।। (जै.न्या.वि 1.1.6,7)

धर्मः द्वादशलक्षणैः व्युत्पादितः। षविना प्रमाणं प्रमा नोपगच्छतिष अतः धर्मे प्रमाणं विचारितं प्रथमाध्याये। द्वितीये षट्कर्मभेदबोधकप्रमाणैः कर्मणां भेदः प्रतिपाद्यते। तृतीये शेषी शेषेण निष्पद्यते, अर्थात् फलदायकः भवति इति धिया शेषत्वं निरूपितम्। तद्बोधकानि षट् प्रमाणानि च तत्रैव निरूपितानि। चतुर्थे क्रतूपकारकाणां क्रत्वर्थानां तथा पुरुषार्थानां परस्परभेदान् अवबोध्य तौ निरूपितौ। पञ्चमे पूर्वापरभावरूपः क्रमः सुचिन्तितः। षष्ठे फलभोक्ता कः ? कस्य अधिकारः ? इत्यादीनां निरूपितत्वात् सोऽधिकाराध्यायः। सप्तमे सामान्यातिदेशः विकृत्युपयोगितया विचिन्तितः। स एवाष्टमे विशेषेण विचारितः। नवमे प्रकृतौ अन्यथादृष्टस्य विकृतौ अन्यथाभावत्वेन ऊहः सुचिन्तितः। दशमे प्रकृतिसम्बन्धिनः पदार्थस्य विकृत्यङ्गःत्वग्राहकप्रमाणाभावरूपः बाधः विचारितः। एकादशे सकृदनुष्ठाने बहूनाम् उपकुर्वाणं तन्त्रं प्रतिपादितम्। द्वादशे अन्योद्देशेन कृतेन अन्यस्य उपकारकः प्रसङ्गः विचारितः। इत्थं द्वादशसु अध्यायेषु धर्मज्ञानोपकारकाणि प्रमाणानि प्रतिपादितानि। सर्वत्र साधकबाधकानि धर्मे निरूपितानि। एकस्मिन् अध्याये चत्वारः पादाः वर्तन्ते। तृतीये, षष्ठे, दशमे च अष्टौ पादाः विराजन्ते। एते शरभाध्यायाः इति प्रसिद्धाः। आहत्य षष्टिपादाः सन्त्यस्मिन्। अधिकरणरूपेण विचारः शास्त्रेऽस्मिन् प्रसिद्धः। अधिकरणलक्षणं श्रूयते यथा–

**अधिकरणस्वरूपम्** :

विषयो विशयश्चौव पूर्वपक्षस्तथोत्तरम्।
प्रयोजनं सङ्गःतिश्चौव प्राञ्चोऽधिकरणं विदुः।। (भा.दी.भू.1)

विषयो नाम विवादाध्यासितं किञ्चित् वेदवाक्यम्। विशयः इत्युक्ते सन्देहः इत्यर्थः। पूर्वपक्षः सिद्धान्तप्रतिवादी भवति। उत्तरस्तु सिद्धान्तपक्षः। सङ्गःतिर्नाम निरूपितविषयेण सह निरूपणीयविषयस्य सम्बन्धः। फलं स्वकीयं भिन्नञ्च भवति। इत्थञ्च विषयवाक्ये सन्देहः तत्र पक्षद्वयस्य जिज्ञासा। ततः परम् उभयत्र फलम् इति अधिकरणस्वरूपं ज्ञेयम्। आहत्य मीमांसाशास्त्रे अष्टशतोत्तरम् एकपञ्चाशत् (851) अधिकरणानि प्रसिद्धानि। तथा च अत्र विद्यमानानां जैमिनीयसूत्रसङ्ख्या पञ्चविंशत्युत्तरसप्तविंशतिशतानि (2725) इति ज्ञेया।

**शास्त्रानुबन्धः** :
महदिदं शास्त्रं वेदविज्ञानायैव नास्तिकबुद्धिविनाशाय प्रवृत्तम्। तदेवं वार्तिककारेण निरूपितम् –

प्रायेणैव हि मीमांसा लोके लोकायतीकृता।
तामास्तिकपथे नेतुमयं यत्नः कृतो मया।। (श्लो.वा 1.1.1.10)
अस्ति कश्चन नियमः स च एवं श्रूयते –
ज्ञातार्थं ज्ञानसम्बन्धं श्रोतुं श्रोता प्रवर्तते।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः।। इति।
तथा च श्रूयते–
अधिकारी च सम्बन्धो विषयश्च प्रयोजनम्।
ग्रन्थादौ एव वक्तव्यम् अनुबन्धचतुष्टयम्।। इति

विषयप्रयोजनाधिकारीसम्बन्धात्मकं अनुबन्धचतुष्टयं शास्त्रादौ निरूपणीयम् इति शिष्टमर्यादा। तत्तु प्रथमसूत्रेणैव प्रसङ्गःात् ज्ञायते। श्रूयते च वार्तिके–
अथातो धर्मजिज्ञासा सूत्रमाद्यमिदं कृतम्।
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्।। इति (श्लो.वा.1.1.1.11)
अथ शब्दस्य आनन्तर्यमर्थः। कस्मादनन्तरमिति जिज्ञासायां स्वाध्यायविधिप्राप्ताध्ययनमाक्षिप्यते। अनेन बुध्यते अध्ययनानन्तरमिति। अनेन अधीतवेदः अधिकारी शास्त्रेऽस्मिन्निति विज्ञेयम्। विषयः धर्मः। प्रतिपाद्यप्रतिपादकभावसम्बन्धः शास्त्रधर्मयोः भवति। प्रयोजनं धर्मज्ञानम्। ननु क्लेशेन प्राप्तेन वाक्यार्थज्ञानेन किं वा प्रयोजनमितिचेत्, प्राप्तज्ञानेन अनुष्ठितेन कर्मणा स्वर्गादीनि फलानि लभ्यन्ते। तदेव परमोद्देशः मानवानाम्। वयन्तु लौकिकाः अल्पमतयः। स्वर्गादिकं फलं भवेच्चेत् यागादयः अनुष्ठेयाः इत्यभ्युपगच्छामः। स्वर्गादयः यागसमनन्तरमेव नोपलभ्यन्ते। देशान्तरे वा देहान्तरे वा कालान्तरे वा लभ्यन्ते। तत्रापि संशयः स्यात्। परन्तु वेदबोधितानि कर्माणि संशययोग्यानि भवितुं नार्हन्ति। बाधकज्ञानाभावात् स्वतः प्रमाणत्वाच्च वेदः परमं प्रमाणम्।

**मीमांसादर्शनस्य कर्मानुष्ठाने सार्थक्यनिरूपणम्** :
अस्तु वा कल्पसूत्रेणैव कर्मज्ञानं भवति। अनेकाः स्मृतयः वर्तन्ते। तादृशैरेव कर्मज्ञानं सुस्पष्टं भवति। किं पुनः मीमांसया प्रयोजनमितिचेत्। न। व्याकरणेन शब्दार्थज्ञानं भवति। नास्ति संशयः। कल्पेन प्रयोगज्ञानं भवति। नास्ति तत्रापि संशीतिः। निरुक्तेन विशेषपदार्थोऽपि बुध्यते नास्ति तत्रापि सन्देहलेशः। परन्तु सन्ति अवस्थान्तराणि। स यथा अक्ताः शर्कराः उपदधाति (तै.ब्रा.3.12.5.12) इत्यादिषु स्थानेषु अन्यैः शास्त्रैः दुश्शकोऽर्थनिर्णयः। अङ्गाङ्गीज्ञानं वा कर्मज्ञानं वा नान्येन शास्त्रेण लभ्यते। तावद्भिः वेदैरपि कर्मज्ञानं भवति किल ? इति चेत् वेदेनाधिगतेन क्रमेण अग्निहोत्रानन्तरं ओदनपाकः लभ्यते। स तु अनुपयोगी। अतः कर्मानुष्ठाने मीमांसा अपेक्षिता भवति।

**आन्येभ्यः दर्शनेभ्यः भिन्नमिदं मीमांसादर्शनम् धर्मानुष्ठानाय आदरणीयम्** :
व्यवहारे भाट्टनयाः इति उक्तिरपि प्रसिद्धा। इदं लौकिकज्ञानावबोधकमपि भवति। मीमांसान्यायाः स्मार्तकर्मणि तान्त्रिककर्मण्यपि प्रयोजकाः। सर्वाणि शास्त्राणि आनुषङ्गिकतया धर्मं बोधयन्ति धर्मलक्षणं प्रतिपादयन्ति च। परं मीमांसाशास्त्रं साक्षात् धर्मं धर्मानुष्ठानमपि प्रतिपादयति। मीमांसाशास्त्रसिद्धान्तः अन्येभ्यः शास्त्रेभ्यः भिन्नः। मीमांसकाः षट् प्रमाणानि अङ्गीकुर्वन्ति। तार्किकाः चत्वारि। साङ्ख्याः प्रमाणत्रयम्। चार्वाकाः प्रमाणमेकम् अभ्युपगच्छन्ति। स्वशास्त्रे प्रतिपाद्यमानविषयोपयोगितया प्रमाणादीनां चिन्तनं प्रवर्तते। शाब्दबोधे वैयाकरणाः धात्वर्थमुख्यविशेष्यतां प्रतिपादयन्ति। तार्किकाः प्रायः प्रथमान्तार्थस्य मुख्यविशेष्यताम् अङ्गीकुर्वन्ति। मीमांसकाः प्रत्ययार्थभावनायाः मुख्यत्वं सिद्धान्तयन्ति। एवं मीमांसाशास्त्रं वेदविचाराय प्रवृत्तम्। वेदान्तः ब्रह्मतत्वज्ञानाय। न्यायः पदार्थविवेचनाय। व्याकरणं शब्दानां साधुत्वप्रतिपादनाय प्रवृत्तम्। सर्वेषाम् उद्देश्यं भिन्नं भिन्नम् एव वरीवर्तते। अतस्तेषां प्रतिपादनावसरे भिन्नत्वमेव दरीदृश्यते। बहुषु स्थलेषु शास्त्रेषु विरोधः विद्योतते। परन्तु तादृशावसरे शास्त्रमर्यादया जिज्ञासा युक्ता भवति। सर्वेषां शास्त्राणां नैकमत्यं सदा भवत्येव। उद्देश्यस्य विभिन्नत्वात्। अतः कर्मावबोधनमार्गे नान्यत् शास्त्रं विद्यते मीमांसां विना। वेद एव परमं प्रमाणम् इति अङ्गीकुर्वाणाः मीमांसकाः तन्मूलकतया एव स्मृत्यादीनां प्रामाण्यम् अभ्युपगच्छन्तः कर्मणां प्राशस्त्यदुन्दुभिं दिगन्तरालकुहरे ताडं ताडमापूरयन्ति। अत एव इदं वेदविज्ञानशास्त्रं सर्वैरपि आदरणीयम्।

।। ग्रथने आदृतानां ग्रन्थानां नामानि।।


1. शाबरभाष्यम् : आनन्दाश्रमसंस्कृतग्रन्थावलिः, ग्रन्थाङ्कः–९७, वैद्यनाथशास्त्रिकृतप्रभाव्याख्यासहितम् । तन्त्रवार्तिकव्याख्यासहितं विनायकगणेश आपटे इत्याख्येन पुणेनगरे आनन्दाश्रमुद्रणालये प्रकाशितः क्रि.श – १८२९
2. तन्त्रवार्तिकम् : आपटेकुलोद्भवः गणेशात्मजो विनायकरायः आनन्दाश्रम पुणे पौषशुद्धचतुर्थ्यां भौमवासरे क्रि.श – १८५० प्रकाशितः ।
3. श्लोकवार्तिकम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यव्याख्यया सहितम् । सम्पादकः डा॥ गङ्गासागररायः । प्रकाशकः रत्नापब्लिकेशन्स् वाराणसि–२२१०१० क्रि.श–२१६३ विक्रम – २०५०।
4. भाट्टकौस्तुभ : सम्पादकः । पं.अ.श्रीचिन्नस्वामिशास्त्री प्रकाशकः राष्ट्रियसंस्कृतसंस्थानमानितविश्वविद्यालयः ५६–५७ इन्स्टिट्यूट्वलय जनकपुरी नवदेहली–११००५८ मुद्रकाः चौकाम्बासंस्कृतसीरिज् आपिस् वाराणसि ।
5. भाट्टदीपिका : प्रधानसंपादकः डा॥ मण्डनमिश्रः, सम्पादकः श्रीसंपन्नारायण आचार्यः, प्रकाशकः राष्ट्रियसंस्कृतसंस्थानं मानित–विश्वविद्यालयः। मुद्रकः अमरप्रिंटिङ्ग्प्रेस् दिल्लि–०६